नवोढ़ा। अस्याश्चेष्टा क्रिया मनोहरा कोपे मार्दवं नवविभूषणे समीहा च। विश्रब्धनवोढ़ा यथा,—

"दरमुकुलितनेत्रपालिनीलो-
नियमितबाहुलतोरुयुग्मबन्धम्।
करकलितकुचस्थलं नवोढ़ा
स्वपिति समीपमुपेत्य कस्य यूनः ॥"

इति रसमञ्जरी ॥

विश्रमः, पुं, ( वि+श्रम+घञ् । वृद्ध्यभावः । ) विश्रामः । इति भरतद्विरूपकोषः ॥ ( यथा, कातन्त्रवृत्तम् । १ । ३ ।

"अविश्रमं यावदिदं शरीरं-
पतत्यवश्यं परिणामदुर्व्वहम् ॥")

विश्रम्भः, पुं, ( वि+श्रम्भ+घञ् । ) विश्वासः । इत्यमरः ॥ ( यथा, भागवते । ३ । २३ । ९ ।

"नित्यं पर्य्यचरत् प्रीत्या भवानीव भवं प्रभुम् ।
विश्रम्भेणात्मशौचेन गौरवेण दमेन च ॥" )

केलिकलहः । प्रणयः । इति मेदिनी । भे, २० ॥ वधः । इति विश्वः ॥

विश्राणनं, क्ली, ( वि+श्रण+णिच्+ल्युट् । ) दानम् । इत्यमरः ॥ ( यथा, रघुः । २ । ५४ ।

"कथं नु शक्योऽनुनयो महर्षे-
र्विश्राणनाच्चान्यपयस्विनीनाम् ॥")

विश्रान्तः, त्रि, श्रान्तियुक्तः । विपूर्व्वकश्रमधातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥

विश्रान्तिः, स्त्री, विश्रामः । विपूर्व्वश्रमधातोः क्तिप्रत्ययेन निष्पन्नमिदम् । (यथा, रामायणे । २ । २ । ८ ।

"जीर्णस्यास्य शरीरस्य विश्रान्तिमभिरोचये ॥")

तीर्थविशेषः । यथा,—

रावण उवाच ।

"पुरी उज्जयनी नाम तस्यां वासो हि मे सदा।
कस्मिंश्चिदथ कालेन गतोऽहं विष्णुमन्दिरम् ॥
तस्याग्रे तिष्ठते विप्रो वाचको वेदपारगः ।
विश्रान्तितीर्थमाहात्म्यं श्रावयेत् स दिने दिने ॥
यस्य श्रवणमात्रेण मम भक्तिर्हृदि स्थिता ।
सा संज्ञा च श्रुता तत्र विश्रान्तेश्च मयानघ ॥
वासुदेवो महाबाहुर्जगत्स्वामी जनार्द्दनः ।
विश्रामं कुरुते तत्र तेन विश्रान्तिसंज्ञिका ॥"

इति वाराहे विश्रान्तिमाहात्म्यनामाध्यायः ॥

विश्रामः, पुं, ( वि+श्रम+घञ् । ) विरामः । इति भरतद्विरूपकोषः ॥ अस्य गुणाः ।

"विश्रामो बलकृत् खेदश्रमजित् स्वास्थ्यदः शुभः ॥"

इति राजवल्लभः ॥

विश्रावः, पुं, ( विश्रवणमिति । वि+श्रु+"श्रौ श्रुवः ।" ३ । ३ । २५ । इति घञ् । ) अति-प्रसिद्धिः । इत्यमरः ॥ ( ध्वनिः । यथा, भट्टिः । ७ । २६ ।

"विश्राविणोऽयविश्रावं तर्ज्जयन्तो महोदधेः ॥")

विश्रिः, पुं, मृत्युः । इति संक्षिप्तसारोणादिवृत्तिः ॥

विश्रुतः, त्रि, ( वि+श्रु+क्तः । ) ख्यातः । इत्यमरः ॥ ( यथा, कथाविलासे । २ । ५६ ।

"विद्वान् सुभगो मानी
विश्रुतकर्म्मा कुलोन्नतः शूरः ।
वित्तेन भवति सर्व्वो
वित्तहीनस्तु सद्गुणोऽप्यगुणः ॥")

ज्ञातः । संहृष्टः । इति विश्वः ॥

विश्रुतिः, स्त्री, विख्यातिः । विपूर्व्वश्रुधातोः क्तिप्रत्ययेन निष्पन्नमिदम् ॥ ( यथा, भागवते । ३ । २५ । २ ।

"विश्रुतौ श्रुतदेवस्य भूरि तृप्यन्ति मेऽसवः ॥")

विश्लेषः, पुं, ( वि+श्लिष्+घञ् । ) विधुरः । अयोगः । इति मेदिनी ॥ (यथा, रघुः ।१३।२३।

"सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमुर्व्व्याम् ।
अदृश्यत त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम् ॥")

विश्वं, क्ली, ( विशति स्वकारणमिति । विश प्रवेशने+"अशूप्रुषिलटिकणीति ।" उणा० १।१५१। इति क्वन् । ) जगत् । इति मेदिनी । वे, २३ ॥ ( यथा, भागवते । ३ । १० । १२ ।

"विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया ।
ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना ॥")

शुण्ठी । ( अस्य पर्य्यायो यथा,—

"विश्वं महौषधं शुण्ठी नागरं विश्वभेषजम् ।"

इति वैद्यकरत्नमालायाम् ॥

"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम् ।
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) बोलम् । इति राजनिर्घण्टः ।

विश्वः, पुं, गणदेवताविशेषः । इत्यमरः ॥

"वसुसत्यौ क्रतुदक्षौ कालकामौ धृतिः कुरुः ।
पुरूरवा माद्रवाश्च विश्वेदेवाः प्रकीर्त्तिताः ॥"

इति भरतः ॥*॥

"इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नान्दीमुखे वसुः ।
नैमित्तिके कालकामौ काम्ये च धूरिलोचनौ ।
पुरूरवा माद्रवाश्च पार्व्वणे समुदाहृतौ ॥"

इति स्मृतिः ॥

ते तु धर्म्मात् दक्षकन्यायां विश्वायां जाताः । इति मात्स्ये ५ अध्यायः ॥*॥ नागरः । इति विश्वः ॥ स्थूलशरीरव्यष्ट्युपहितचैतन्यम् । इति वेदान्तसारः ॥*॥ परिमाणविशेषः । यथा,—

"गुञ्जाभिस्त्रयवतिस्रोभी द्रम्मं तद्भवेत् पलम् ।
विश्वा विंशपलं प्रोक्तं दिव्यं कोटिगुणं हि तत् ।
सैव कोटिगुणा माषौ विश्वाः शस्यादि-
सम्भवाः ॥"

इति ज्योतिस्तत्त्वं ॥

विश्वः, त्रि, (विश+क्वन् ।) सकलम् । इत्यमरः ॥ ( यथा, महाभारते । ३ । २१८ । १६ ।

"यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति ।
तं प्राहुरध्यात्मविदो विश्वजिन्नाम पावकम् ॥"

बहु । इति निघण्टुः । ३ । १ ॥ )

विश्वकद्रुः, पुं, मृगयाकुशलकुक्कुरः । इत्यमरः ॥ ध्वानः । इति मेदिनी । रे, २६६ ॥

विश्वकद्रुः, त्रि, खलः । इति मेदिनी । रे, २६६ ॥

विश्वकर्म्मजा, स्त्री, ( विश्वकर्म्मणः जायते इति । जन+डः । ) सूर्य्यभार्य्या । संज्ञा । इति शब्दरत्नावली ॥

विश्वकर्म्मसुता, स्त्री, ( विश्वकर्म्मणः सुता । ) सूर्य्यभार्य्या । संज्ञा । इति शब्दरत्नावली ॥

विश्वकर्म्मा, [न्] पुं, (विश्वेषु कर्म्म यस्य ।) सूर्य्यः । देवशिल्पी । इत्यमरः । तत्पर्य्यायः । त्वष्टा २ विश्वकृत् ३ देववर्द्धकिः ४ । इति हेमचन्द्रः ॥ ( यथा, महाभारते । १ । २१२ । १० ।

"दृष्ट्वा च विश्वकर्म्माणं यादिदेश पितामहः ॥")

मुनिभेदः । इति मेदिनी । ने, २४७ ॥ स प्रभासस्य वसोः पुत्त्रः । यथा,—

"विश्वकर्म्मा प्रभासस्य पुत्त्रः शिल्पप्रजापतिः ।
प्रासादभवनोद्यानप्रतिमाभूषणादिषु ।
तडागारामकूपेषु स्मृतः सोऽमरवर्द्धकिः ॥"

इति मात्स्ये ५ अध्यायः ॥*॥

अन्यच्च ।

"प्रत्यूषस्य विदुः पुत्त्रमृषिं नाम्ना तु देवलम् ।
विश्वकर्म्मा प्रभासस्य विख्यातो देववर्द्धकिः ॥"

इति गारुड़े ६ अध्यायः ॥*॥

अपि च ।

"बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी ।
योगसिद्धा जगत् कृत्स्नमसक्ता विचरत्युत ॥
प्रभासस्य तु भार्य्या सा वसूनामष्टमस्य तु ।
विश्वकर्म्मा महाभागस्तस्यां जज्ञे महामतिः ॥
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः ।
भूषणानाञ्च सर्व्वेषां कर्त्ता शिल्पवतां वरः ॥
यः सर्व्वेषां विमानानि देवतानां चकार ह ।
मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः ॥"

इति विष्णुपुराणे १ अंशे १५ अध्यायः ॥

अन्यच्च ।

"द्वौ प्रोक्तौ विश्वकर्म्माणौ मयस्त्वष्टा च योग-
वित् ।
द्वौ धाता च विधाता च पौराणौ जगतः-
पती ॥"

इति वह्निपुराणे गणभेदो नामाध्यायः ॥

( चेतनाधातुः । तद्दर्शितिर्यथा । "तत्र पूर्व्वं चेतनाधातुः सत्त्वकरणो गुणग्रहणाय प्रवर्त्तते । स हि हेतुः कारणं निमित्तमक्षरं कर्त्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्म्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यो गुणी ग्रहणं प्राधान्यमव्यक्तं जीवो ज्ञः पुद्गलश्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति ।" इति चरके शारीरस्थाने चतुर्थेऽध्याये ॥)

विश्वका, स्त्री, गङ्गाचिल्ली । यथा,—

"गङ्गाचिल्ली तु देवट्टी विश्वका जलकुक्कुटी ।"

इति हारावली ॥

विश्वकृत्, पुं, ( विश्वं करोतीति । कृ+क्विप् । ) विश्वकर्म्मा । इति हेमचन्द्रः ॥ ( यथा, महाभारते । १ । २१२ । ११ ।

"त्रिषु लोकेषु यत्किञ्चित् भूतं स्थावरजङ्गमम् ।